শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রীৱামন পুরাণে

# ॥শ্রীদধিৱামনস্তোত্রম্॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রীদধিৱামনস্তোত্রম্ ॥

হেমাদ্রিশিখরাকারং শুদ্ধস্ফটিকসন্নিভম্।
পূর্ণচন্দ্রনিভং দেৱং দ্বিভুজং ৱামনং স্মরেত্॥ ১ ॥

পদ্মাসনস্থং দেৱেশং চন্দ্রমণ্ডলমধ্যগম্।
জ্বলতকালানলপ্রখ্যং তডিতকোটিসমপ্রভম্॥ ২ ॥

সূর্যকোটিপ্রতীকাশং চন্দ্রকোটিসুশীতলম্।
চন্দ্রমণ্ডলমধ্যস্থং ৱিষ্ণুমচ্যুতমৱ্যযম্॥ ৩ ॥

শ্রীৱতসকৌস্তুভোরস্কং দিৱ্যরত্নৱিভূষিতম্।
পীতাম্বরমুদারাঙ্গং ৱনমালাৱিভূষিতম্॥ ৪ ॥

সুন্দরং পুণ্ডরীকাক্ষং কিরীটেন ৱিরাজিতম্।
ষোডশস্ত্রীপরিৱৃতমপ্সরোগণসেৱিতম্॥ ৫ ॥

ঋগ্যজুঃসামাথর্ৱাদ্যৈঃ গীযমানং জনার্দনম্।
চতুর্মুখাদ্যৈর্দেৱৈশৈঃ স্তোত্রারাধনততপরৈঃ॥ ৬ ॥

সনকাদ্যৈর্মুনিগণৈঃ স্তূযমানমহর্নিশম্।
ত্রিযম্বকো মহাদেৱো নৃত্যতে যস্য সন্নিধৌ॥ ৭ ॥

দধিমিশ্রান্নকৱলং রুক্মপাত্রং চ দক্ষিণে।
করে তু চিন্তযেদ্বামে পীযূষমমলং সুধীঃ॥ ৮ ॥

সাধকানাং প্রযচ্ছন্তমন্নপানমনুত্তমম্।
ব্রাহ্মে মুহূর্তে চোত্থায ধ্যাযেদ্দেৱমধোক্ষজম্॥ ৯ ॥

অতিসুৱিমলগাত্রং রুক্মপাত্রস্থমন্নং
সুললিতদধিখণ্ডং পাণিনা দক্ষিণেন।
কলশমমৃতপূর্ণং ৱামহস্তে দধানং
তরতি সকলদুঃখাদ্বামনং ভাৱযেদ্যঃ॥ ১০ ॥

ক্ষীরমন্নমন্নদাতা লভেদন্নাদ এৱ চ।
পুরস্তাদন্নমাপ্নোতি পুনরাৱর্তিৱর্জিতম্।
আযুরারোগ্যমৈশ্বর্যং লভতে চান্নসম্পদঃ॥ ১১ ॥

ইদং স্তোত্রং পঠেদ্যস্তু প্রাতঃকালে দ্বিজোত্তমঃ।
অক্লেশাদন্নসিদ্ধ্যর্থং জ্ঞানসিদ্ধ্যর্থমেৱ চ॥ ১২ ॥

অভ্রশ্যামঃ শুভ্রযজ্ঞোপৱীতী
সতকৌপীনঃ পীতকৃষ্ণাজিনশ্রীঃ।
ছত্রী দণ্ডী পুণ্ডরীকাযতাক্ষঃ
পাযাদ্দেৱো ৱামনো ব্রহ্মচারী॥ ১৩ ॥

অজিনদণ্ডকমণ্ডলু মেখলা-
রুচিরপাৱনৱামনমূর্তযে।
মিতজগত্ত্রিতযায জিতারযে
নিগমৱাকপটৱে ৱটৱে নমঃ॥ ১৪ ॥

শ্রীভূমিসহিতং দিৱ্যং মুক্তামণিৱিভূষিতম্।
নমামি ৱামনং ৱিষ্ণুং ভুক্তিমুক্তিফলপ্রদম্॥ ১৫ ॥

ৱামনো বুদ্ধিদাতা চ দ্রৱ্যস্থো ৱামনঃ স্মৃতঃ।
ৱামনস্তারকোভাভ্যাং ৱামনায নমো নমঃ॥ ১৬ ॥

॥ ইতি শ্রীদধিৱামনস্তোত্রং সংপূর্ণম্॥

www.prapatti.com